श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथ पादुकासहस्रम् ॥

## ॥ पद्मरागपद्धतिः सप्तदशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ पद्मरागपद्धतिः सप्तदशी ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

प्रपद्ये रङ्गनाथस्य पादुकां पद्मरागिणीम्।
पदैकनियतां तस्य पद्मवासामिवापराम्॥ १७.१ ॥

अतिवाङ्मनसं विचिन्त्य शौरेः
पदरक्षे ! पदपद्मसौकुमार्यम्।
परिपुष्यसि पद्मरागभासा
पदवीमाहितपल्लवामिव त्वम्॥ १७.२ ॥

पदपल्लवसङ्गिभिः प्रदीप्तैः
अधिकोल्लासिभिरम्ब ! पद्मरागैः।
अनले शयनं क्वचिन्मुरारेः
अविसंवादयसीव पादुके ! त्वम्॥ १७.३ ॥

विवृणोति रङ्गपतिरत्नपादुके !
त्वयि पद्मरागमणिपद्धतिः शुभा।
निबिडोरुसङ्घटनपीडनक्षरन्
मधुकैटभक्षतजपङ्कवासनाम्॥ १७.४ ॥

प्रतियन्ति रङ्गपतिपादुके ! जनाः
तव पद्मरागमणिरश्मिसन्ततिम्।
अभिजग्मुषां त्वदनुभावखण्डिताद्-
अघसञ्चयाद्विगलितामसृक्छटाम्॥ १७.५ ॥

पश्यन्ति रङ्गेश्वरपादुके ! त्वां
पौराङ्गनाः स्पर्शितरागबन्धाम्।

शृङ्गारयोनेर्ज्वलनस्य दीप्तैः
    अङ्गारजालैरिव पद्मरागैः॥ १७.६ ॥

अवैमि दोषापगमस्य हेतुं
    तमोपहां सम्भृतपद्मरागाम्।
अशेषवन्द्यां मणिपादुके ! त्वां
    रङ्गेशसूर्योदयपूर्वसन्ध्याम्॥ १७.७ ॥

अवाप्य पादावनि ! रङ्गभर्तुः
    पादाम्बुजे पल्लवसंस्तराभाम्।
त्वत्पद्मरागद्युतयो भजन्ते
    कालानलत्वं कलुषाम्बुधेर्नः॥ १७.८ ॥

निसर्गसिद्धं मणिपादरक्षे !
    देवस्य रङ्गावसथप्रियस्य।
बालार्कवर्णाः पदपद्मरागं
    त्वत्पद्मरागाः पुनरुक्तयन्ति॥ १७.९ ॥

पदेन विश्वं मणिपादरक्षे !
    पत्न्या समं पालयतो मुरारेः।
यशःपयोधौ परिकल्पयन्ति
    प्रवाळशोभां तव पद्मरागाः॥ १७.१० ॥

अर्चिष्मती काञ्चनपादरक्षे !
    प्रस्तौति ते पाटलरत्नपङ्क्तिः।
रेखारथाङ्गस्य महःप्रपञ्चम्
    रङ्गेशपादाम्बुजमध्यभाजः॥ १७.११ ॥

त्वयैव पादावनि ! शोणरत्नैः
    बालातपं नूनमुदीरयन्त्या।
पद्मापतेः पादतलप्ररूढं
    रेखाम्बुजं नित्यमभूदनिद्रम्॥ १७.१२ ॥

नित्यं निजालोकपथं गतानां
श्रेयो दिशन्तीं श्रितपद्मरागाम्।
महीयसीं माधवपादरक्षे !
मन्यामहे मङ्गळदेवतां त्वाम्॥ १७.१३ ॥

देवस्य रङ्गरसिकस्य विहारहेतोः
आत्मानमङ्घ्रिकमले विनिवेद्य पूर्वम्।
प्रायो निवेदयसि शोणमणिप्रकाशैः
प्रत्यूषपद्मकलिकां पदरक्षिणि ! त्वम्॥ १७.१४ ॥

प्रत्यङ्मयस्य हविषः प्रणवेन देवि !
प्रक्षेपणाय परमार्थविदां मुनीनाम्।
प्राज्यां मुकुन्दचरणावनि ! पद्मरागैः
पर्यायपावकशिखां भवतीं प्रतीमः॥ १७.१५ ॥

सम्प्रद्यते तव पदावनि ! पद्मरागैः
प्रस्थानमाङ्गळिकहोमहुताशनश्रीः।
क्षीराहुतिर्भवति यत्र विकल्पगङ्गा
रङ्गेश्वरस्य रुचिरा नखरश्मिधारा॥ १७.१६ ॥

आमुञ्चतामरुणयावकपङ्कलक्ष्मीं
शोणाश्मनां तव पदावनि ! कान्तियोगात्।
पद्मासहायपदपद्मनखाः श्रयन्ते
सन्ध्यानुरञ्जितसुधाकरबिम्बशोभाम्॥ १७.१७ ॥

स्थाने तवाच्युतपदावनि ! पद्मरागाः
तेजोमयाः प्रशमयन्ति तमो मदीयम्।
चित्रं तदेतदिह यज्जनयन्ति नित्यं
रागात्मकेन महसा रजसो निवृत्तिम्॥ १७.१८ ॥

पद्माकरान्तरविकासिनि रङ्गभर्तुः
पीत्वा पदावनि ! मधूनि पदारविन्दे।

शोणोपलद्युतिमयीं सुभगप्रचारां
    मन्ये बिभर्षि महतीं मदरागशोभाम्॥ १७.१९ ॥

पादावनि ! प्रसृमरस्य कलेर्युगस्य
    प्रायेण सम्प्रति निवारयितुं प्रवेशम्।
श्रीरङ्गसीम्नि तव शोणमणिप्रसूतः
    प्राकारमग्निमयमारभते प्रकाशः॥ १७.२० ॥

लीलागृहान्तरविहारिणि रङ्गनाथे
    लाक्षारसैररुणरत्नमयूखलक्ष्यैः।
प्रायेण रञ्जयति पादसरोजयुग्मं
    सैरन्ध्रिकेव भवती मणिपादरक्षे !॥ १७.२१ ॥

रङ्गेशितुर्विहरतो मणिपादरक्षे !
    रथ्यान्तरे सुमनसः परिकीर्यमाणाः।
त्वत्पद्मरागकिरणच्छुरणाद्व्रजन्ते
    सन्ध्यातपान्तरिततारकपङ्क्तिलक्ष्मीम्॥ १७.२२ ॥

रङ्गाधिराजपदरक्षिणि ! बिभ्रतस्त्वां
    गङ्गातरङ्गविमले गिरिशस्य मौळौ।
संवर्धयन्ति महसा तव पद्मरागाः
    शैलात्मजाचरणयावकपङ्कलक्ष्मीम्॥ १७.२३ ॥

शरणमुपगतानां शर्वरीं मोहरूपां
    शमयितुमुदयस्थान्मन्महे बालसूर्यान्।
पदसरसिजयोगाद्रङ्गनाथस्य भूयः
    परिणमदरुणिम्नः पादुके ! पद्मरागान्॥ १७.२४ ॥

हरिपदरुचिराणां पादुके ! तावकानाम्
    अरुणमणिगणानां नूनमर्धेन्दुमौळिः।
प्रणतिसमयलग्नां वासनामेव धत्ते
    कळमकणिशकान्तिस्पर्धिनीभिर्जटाभिः॥ १७.२५ ॥

प्रतिविहरणमेते पादुके ! रङ्गभर्तुः
पदकमलसगन्धाः पद्मरागास्त्वदीयाः।
तरुणतपनमैत्रीमुद्वहद्भिर्मयूखैः
स्थलकमलविभूतिं स्थापयन्त्यव्यवस्थाम्॥ १७.२६ ॥

अयमनितरभोगान् रञ्जयन् वीतरागान्
अरुणमणिगणानां तावकानां प्रकाशः।
मधुरिपुपदरक्षे ! मङ्क्षु जाज्वल्यमानः
शलभयति जनानां शाश्वतं पापराशिम्॥ १७.२७ ॥

प्रचुरनिगमगन्धाः पादुके ! रङ्गभर्तुः
पदकमलसमृद्धिं प्रत्यहं भावयन्तः।
दधति शकलयन्तो गाढमन्तस्तमिस्रं
समुचितमरुणत्वं तावकाः पद्मरागाः॥ १७.२८ ॥

लाक्षालक्ष्मीमधररुचके रङ्गिणः पादरक्षे !
वक्त्राम्भोजे मदपरिणतिं पद्मरागद्युतिस्ते।
कर्णोपान्ते किसलयरुचिं देवि ! सेवानतानां
सीमन्ते च त्रिदशसुदृशां सौति सिन्दूरशोभाम्॥ १७.२९ ॥

अरुणमणयस्तवैते हरिपदरागेण लब्धमहिमानः।
गमयन्ति चरणरक्षे ! द्युमणिगणं ज्योतिरिङ्गणताम्॥ १७.३० ॥

॥ इति श्रीपादुकासहस्रे पद्मरागपद्धतिः सप्तदशी ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥